Ketu kavacha - Hindi

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ केतु कवचं

ओं अस्य श्री केतु कवच महामंत्रस्य पुरंदर ऋषिः। अनुष्टुप्छंदः। केतुर्देवता। ह्रां बीजं। ह्रीं शक्तिः। ह्रूं कीलकं। मम केतुग्रह प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) रां अंगुष्ठाभ्यां नमः। रीं तर्जनीभ्यां नमः। रूं मध्यमाभ्यां नमः। रैं अनामिकाभ्यां नमः। रौं कनिष्ठिकाभ्यां नमः। रः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुं। रौं नेत्रत्रयाय वौषट्। रः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) धूम्रवर्णं ध्वजाकारं द्विभुजं वरदांगदं। चित्रांबरधरं केतुं चित्रगंधानुलेपनं॥ वैढूर्याभरणं चैव वैढूर्य मकुटोज्वलं। चित्रं कपोतमारूढ्य मेरुं यांतं प्रदक्षिणं॥ केतुं कराळवदनं चित्रवर्णं किरीटिनं। प्रणमामि सदा देवं ध्वजाकारं ग्रहेश्वरं॥ चित्रवर्णं शिरः पातु फालं मे धूम्रवर्णकः। पातु नेत्रे पिंगळाक्षः श्रुती मे रक्तलोचनः॥ घ्राणं पातु सुवर्णाभः द्विभुजं सिंहिकासुतः। पातु कंठं च मे केतुः स्कंधौ पातु ग्रहाधिपः॥ बाहू पातु सुरश्रेष्ठः कुक्षिं पातु महोरगः। सिंहासनः कटिं पातु मध्यं पातु महासुरः॥ ऊरू पातु महाशीर्षो जानुनी च प्रकोपनः। पातु पादौ च मे रौद्रः सर्वांगं रविमर्धकः॥ यः इदं कवचं दिव्यं सर्वरोग विनाशनं। सर्व दुःख विनाशं च सत्यमेव नः संशयः॥ इति पद्म पुराणे केतु कवचं॥

**Please consider the environment -**

**do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com